अ० न श्रीनृसिंहायनमः॥ ॥सूर्येषट्त्रिंशयश्चंद्रे भौमेद्वात्यष्टयोबुधे॥मंदेविंशोगु
१ १९ रौगोब्जाराहोस्सूर्याः सिते विंशेतु २१॥ १॥ एवमष्टोत्तरशतं परमायुःप्रकीर्त्ति
तं॥दिक्षुचत्वारिऋक्षाणिपात्रीणिमात्रीणिविदिक्षुच॥२॥आर्द्रादिचतुष्कस्य
रविश्चंद्रोमघात्रिके॥भौमोहस्तचतुष्कस्यमैत्रत्रयपतिर्बुधः॥३॥मंदस्तो
याच्चतुष्केशोधनिष्ठादित्रयेगुरुः॥अहिर्बुध्न्यचतुष्केशोराहुःशुक्रो
ग्निभत्रिके॥४॥जन्मकालेहिनक्षत्रस्याधिपस्याद्यादशाभवेत्॥
पतःक्रमेणचान्येषांदशाअंतर्दशाअपि॥५॥जन्मर्क्षगतनाडी
शेषंद्वा घ्नंपरायुःकुगजैर्भजेत्॥लब्धंपरायुषःशोध्यंशेषमायुःस्फुटंभवेत्
दशा ॥६॥दशाब्दागुणितंचायुःपरमाब्दविभाजितं॥फलंवर्षादिका
शेषत्रिंश
मं

चस्याद्दशाग्रहक्रमेणैव॥७॥दशाद्दशाहताकायनिघ्नाभिर्भागमाहरे
त॥लब्धंमासाश्चतच्छेषंदिनान्यंतर्दशाइति॥८॥तत्ररवेःप्रतिनक्षत्रंभु
क्तवर्षाणि१।६प्रतिघटिकंभुक्तदिनानि१०एवंनक्षत्रचतुष्केवर्षाणि
सूर्ये६चंद्रस्यप्रतिनक्षत्रंभुक्तवर्षाणि५प्रतिघटिकंमासः१एवंनक्ष
त्रत्रिकेपंचदशवर्षाणि१५भौमस्यप्रतिनक्षत्रंवर्षाणि२प्रतिघटिकंदि
नानि।१२एवंनक्षत्रचतुष्टयेभौमस्याष्टवर्षाणि८बुधस्यप्रतिनक्ष
त्रंवर्षाणि५मासाः८प्रतिघटिकंमासाः४दि०४१।एवंबुधेवर्षाणि१७
॥ ॥शनेःपूर्वाषाढाघटी६०उत्तराषाढाघ०१५अभिजितघ०१श्रवणघ०
५६पूर्वाषाढाघटीदिनानि१५उत्तराषाढाघटीदिन०२०अभिजित

अ० टी० मासा दि० १।१७।२२ अवशेषदिनानि १६।४ एवं भौमस्य चतुष्टये वर्षाणि १०॥
२ ॥गुरोः प्रतिनक्षत्रं व० ६।४ प्रतिघटिकं मासः १।४ एवं गुरोर्वर्षाणि १५
ख ॥ ॥ राहोः प्रतिनक्षत्रं वर्षाणि २ प्रतिघटिकं दि० १८ एवं वर्षाणि १२ ॥ ॥ सि
तस्य प्रतिनक्षत्रं व० ७ प्रतिघटिकं मासाः ७ दि० १२ एवं भृगोर्वर्षाणि २१॥
॥यस्मिन्समये जन्म भवति तस्मिन्समये यस्य ग्रहस्य नक्षत्रप्रमाणेन यावती
दशा भुक्ता तावतीं परित्यजेत्॥ अवशिष्टप्रमाणात्तस्य दशा भोग्या सा आ
दौ भवति॥ ततोऽनंतरमनुक्रमेण सर्वेषां भवंति॥ अथ दशा अन्तर्दशा फला
नि॥ ॥रविदशा वर्ष ६ फलं ॥ उद्विग्नताचित्तपरिखेदितवित्तनाशक्लेशप्रवा
सरुजपीडितदाहनिघातं॥ संक्षोभितः स्वजनबंधुवियोगमेति सूर्यदशाभ

वतिराजकुलान्निबंधः॥१॥तत्रावेरंतर्दशामासाः ४ फलं सूर्येराज
कुलहानपीडास्यास्त्रिभंभवा॥विषादोबांधवानां च चित्तानां व्यय
एवच॥२॥ततश्चंद्रांतर्दशामासाः १० फलं शत्रुनाशोजयश्चैव
वित्तलाभः सुखागमः॥भवेदंतर्दशायांहिसूर्यस्यांतर्गतेविधो॥
३॥ततोभौमस्यांतर्दशामासाः ५ दि० १० फलं हेमलाभश्चसंभा
नोमणिरत्नप्रवालकं॥प्राप्यतेचजयोमानः सूर्यस्यांतर्गतेकुजे॥४॥
ततोबुधस्यमासाः ११ दि० ९० फलं कुष्ठादिव्याधयः पीडापामा
विचर्चिकादिकं॥ततः सर्वं प्राप्यते क्षिप्रं सूर्यस्यांतर्गतेबुधे॥५॥शनेः
र्मासाः ६ दिनानि २० फलं शत्रुनाशोराजभीतिः कलहः सुखनाश

॥श्र० ।टी० नं॥ सुहृज्जनस्थैवैकस्यंभानोरंतर्गतेशनौ॥६॥ गुरोरंतर्दशावर्षं १ मा० दि०
३ २० फलं व्यसनैर्व्याधिभिः पापैरलक्ष्म्यायुज्यतेनरः॥ प्राप्नोतिगौरवंविद्या
भानोर्जीवोयदागतः॥७॥ राहोर्मासाः८ फलं सांकाशं व्यसनंचैववित्तनाशं
सुखक्षयं॥ सर्वत्रैवाशुभंविद्यात्सूर्यस्यांतर्गतेतमे॥८॥ भृगोर्वर्षं १ मासाः२
फलं शरीरपीडोदररोगश्चज्वरातिसारशूलकेः॥ द्रव्यासिः स्नेहनाशः सू स्यात्
र्यस्यांतर्गतेसिते॥९॥ इतिसूर्यदशायामंतर्दशाः॥ ॥ ततोमयात्रिकेचं
द्रदशावर्षं १५ फलं॥ सम्यग्विभूतिवरवारणयानछत्रक्षेमप्रतापबलवी
र्यसुखान्वितश्च॥ मिष्टान्नपानशयनासनसौख्यानित्यंददातिधनकांचन ३
भूमिलाभं॥१॥ तत्रादौचंद्रांतर्दशा॥ वर्षं २ मास १ फलं॥ भव्यस्त्रीभिः